Total No. of Questions : 6 ] [ Total No. of Printed Pages : 1

**Code No. : US-01**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.॥ – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः -रसगङ्गाधरः - ३

**दिनाङ्कः** - Date : 18-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**I. सङ्क्षिप्तमुत्तरं लिखत** **1x5= 5**

१. मम्मटाद्याचार्यणां मते 'अनवच्छेदे विशेषस्मृतिहेतवः' इत्यस्य कोऽर्थः ?

२. जगन्नाथमते योगरूढिस्थले व्यञ्जनया कोऽर्थः प्रतीयते ?

३. संयोगस्य लक्षणं किम् ?

४. 'नभो भाति' इत्यत्र नियामकः कः ?

५. 'तदप्राप्तिमहादुःखविलीनाशेषपातका' इत्यत्र तत्पदस्य कोऽर्थः ?

**II. यथारुचि त्रयाणां विवरणं लिखत ।** **3x5= 15**

१. उदितं मण्डलमिन्दोरुदितं सद्यो वियोगिवर्गेण ।
मुदितं च सकलललनाचूडामणिशासनेन मदनेन ॥

२. प्राणापहरणेनासि तुल्यो हालाहलेन मे ।
शशाङ्क केन मुग्धेन सुधांशुरिति भाषितः ॥

३. मुनिः श्ववदयं भाति सततं पर्यटन् महीम् ।
विनिवृत्तक्रियाजातः श्वापि लोके शुकायते ॥

४. रणाङ्गणे रावणवैरिणो विभोः शरास्समन्ताद्वलिता विरेजिरे ।
निदाघमध्यं दिनवर्तिनोऽम्बरे सहस्रभानोः प्रखराः करा इव ॥

**III.** नानार्थशब्दजबोधे ध्वनिकारमतं प्रतिपादयत । **15**

**IV.** का नाम अभिधा ? सोदाहरणं भेदान् विवृणुत । **15**

**V.** सादृश्यस्य समानधर्मरूपत्वे कथं बोधो जायते । **15**

**VI.** चित्रमीमांसायां निरूपितोपमालक्षणं निराकुरुत । **15**

—०—

Total No. of Questions : 5] [ Total No. of Printed Pages : 2

**Code No. : US-02**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः -रसगङ्गाधरः - ४

**दिनाङ्कः** - Date : 19-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**I. सङ्क्षिप्तमुत्तरं लिखत** **10x1= 10**

१. 'निशामुखं चुम्बति चन्द्र एषः' इत्यत्र कोऽलङ्कारः ?

२. सारूप्यादपि समासोक्तिः दृश्यते इति कस्य वचनम् ?

३. पर्यायोक्ते भयङ्ग्यन्तरं नाम किम् ?

४. 'अगोद्धारकोऽपि नागोद्धारकः:' इत्यत्र कोऽलङ्कारः ?

५. 'श्रुत्यैकयानेकार्थप्रतिपादनम्' इति कस्य लक्षणम् ?

६. असङ्गत्यलङ्कारस्य लक्षणं किम् ?

७. 'देव त्वमेव पातालम्' इत्यत्र अर्थद्वयं किम् ?

८. रसगङ्गाधरे अन्तिमोऽलङ्कारः कः ?

९. वामनस्य मतेन यथासङ्ख्यालङ्कारस्य किं नाम ?

१०. दोषस्यापि प्रार्थनं कस्मिन्नलङ्कारे भवति ?

**II. त्रीनलङ्कारान् सोदाहरणं निरूपयत।** **3x5= 15**

१. अप्रस्तुतप्रशंसा २. सारः ३. परिकरः

४. अवज्ञा ५. विभावना

**III. प्रश्नत्रयमुत्तरयत।** **3x10= 30**

१. 'पुरा यत्र स्रोतः' इत्यादौ सारूप्यादपि समासोक्तिः दृश्यते' इति मतं दीक्षितस्य निराकुरुत।

२. समासोक्तौ रूपसमारोप इति ग्रन्थकारस्य मतं सोदाहरणं विशदयत।

३. श्लेषस्य सर्वालङ्कारापवादकत्वमिति उद्भटमतं विवृणुत।

–अनुवर्तते

४. कारणमालायां प्रक्रमभङ्गः कथं सम्भवतीति प्राचीनानां पद्यमुपन्यस्य स्फुटयत ।

५. नरेन्द्रमौले न वयं राजसन्देशहारिणः ।
जगत्कुटुम्बिनस्तेऽद्य न कश्चिच्छत्रुरीक्ष्यते ।। इति पद्ये व्यङ्ग्यविषये दीक्षितमतं दूषयत ।

**IV. पद्यत्रयं व्याख्याय तत्रत्यं विशेषं सयुक्तिमाविष्कुरुत ।** **3x5= 15**

१. साधु दूति पुनः साधु कर्तव्यं किमतः परम् ।
यन्मदर्थे विलूनासि दन्तैरपि नखैरपि ।।

२. त्वामवश्यं सिसृक्षन्त्यः सृजति स्म कलाधरम् ।
किं वाच्यं तस्य वैदुष्यं पुराणस्य महामुनेः ।।

३. कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
साच सकुमारसुभगेत्युत्पातपरम्परा ।।

४. खिद्यति सा पथि यान्ती कोमलचरणा नितम्बभारेण ।
खिद्यन्ति हन्त परितस्तद्रूपविलोकिनस्तरुणाः ।।

५. गिरयो गुरवस्तेभ्योऽप्युर्वी ततोऽपि जगदण्डम् ।
जगदण्डादपि गुरवः प्रलयेऽप्यचला महात्मनः ।।

**V. द्वयोः युग्मयोः वैलक्षण्यं सोदाहरणं स्फुटीकुरुत ।** **2x5= 10**

१. मीलितम् - सामान्यम्

२. काव्यलिङ्गम् - अर्थान्तरन्यासः

३. समासोक्तिः - अप्रस्तुतप्रशंसा ।

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : US-03**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.II — विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्— अलङ्कारशास्त्रम्

## भागः - १, पत्रिका - ३

## विषयः - ध्वन्यालोकः-२

**दिनाङ्कः** - Date : 20-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 80

---

**I. सङ्क्षिप्तमुत्तरं लिखत** **10x1= 10**

१. सप्तैताः समिधः श्रियः- अत्र लक्षणामूलध्वनेः कः प्रभेदः ?

२. या निशा सर्वभूतानां तस्यां जागर्ति संयमीत्यत्र निशाशब्दस्य लक्ष्यार्थः कः ?

३. सङ्घटना कानाश्रित्य तिष्ठन्ती रसान् व्यनक्ति ।

४. कवेरव्युत्पत्तिकृतो दोषः कया संव्रियते ?

५. कस्माद्दते रसभङ्गस्य अन्यत्कारणं नास्ति ?

६. माधुर्यं कस्मिन् कस्मिन् रसे प्रकर्षवत् ?

७. अपारे काव्यसंसारे प्रजापतिः कः ?

८. धरणीधारणायाधुना त्वं शेष इत्यत्र संलक्ष्यक्रमध्वनेः कः प्रभेदः ?

९. कीदृशं वस्तु लोकप्रसिद्ध्याद्भुतमपि नाश्चर्यकारि भवति?

१०. रामायणे प्रधानो रसः कः ?

**II. वाक्यद्वयं सप्रसङ्गं व्याख्यात** **3x5= 15**

१. पद्योत्येन सुकवेर्ध्वनिना भाति भारती ।

२. नहि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित्प्रयोजनम्, इतिहासादेरेव तत्सिद्धेः ।

३. न तन्मुख्यं काव्यम्, काव्यानुकारोऽसौ ?

४. सारभूतो ह्यर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरामेव शोभामावहति ।

५. स्थितं ह्येतत् संवादिन्य एव मेधाविनां बुद्धयः ।

—अनुवर्तते

**III. तीन् प्रश्नानुत्तरयत** **3x10= 30**

१.प्रबन्धस्य रसाभिव्यञ्जकत्वे कति निबन्धनानि ? विशदीकुरुत ।

२. न्यक्कारो ह्ययमेव मे यदरय इति पद्यं विलिख्य तत्र सुप्तिङादीनां व्यञ्जकत्वं प्रदर्शयत ।

३. रसेषु कीदृशो विरोधः ? तस्मिन् सत्यपि समावेशः कथं सम्भवति ? विवृणुत ।

४. महाभारते को रसः प्रधानः ? किमिर्थम् ? सयुक्तिकं प्रतिपादयत ।

**IV. पद्यत्रयं व्याख्याय तत्रत्यं विशेषं सयुक्तिकमुपपादयत ।** **3x5= 15**

१. शिखिपिच्छकर्णपूरा वधूर्व्याधस्य गर्विणो भ्रमति ।
मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम् ॥

२. अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥

३. अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः ।
श्वः श्वःपापीयदिवसा पृथिवी गतयौवना ॥

४. मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः ।
येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥

**V. कारिकाद्वयं सप्रसङ्गं व्याख्यात ।** **2x5= 10**

१. प्रसिद्धेऽपि प्रबन्धानां नानारसबिन्धने ।
एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता ॥

२. शषौ सरेफसंयोगो ठकारश्चापि भूयसा ।
विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युतः ॥

३. तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम् ।
तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत् कविः ॥

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 2

**Code No. : US-04**

**सङ्केतः -**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.॥ – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– अलङ्कारशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - प्राकृतप्रकाशः सेतुबन्धं च

**दिनाङ्कः** - Date : 21-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

I. (१) सेनापतिः सिंहनादः हर्षवर्धनं किमिति उपदिदेश ? उपवर्णयत। **8**

(२) 'हर्षाख्यायिकया ख्यातिं बाणोऽब्धिरिव लब्धवान्' उक्तिमिमां विमृशत। **10**

II. **सप्रसङ्गं पद्यद्वयं व्याख्यात।** **2 x 5= 10**

१. विद्वज्जनसम्पर्को नष्टेष्टज्ञातिदर्शनाभ्युदयः।
कस्य सुखाय भवने भवति महारत्नलाभश्च॥

२. धृतधनुषि बाहुशालिनि शैलो न नमन्ति यत्तदाश्चर्यम्।
रिपुसञ्ज्ञकेषुगणना कैव वराकेषु काकेषु॥

३. द्वीपोपगीतगुणमपि समुपार्जितरत्नराशिसारमपि।
पोतं पवन इव विधिः पुरुषमकाण्डे निपातयति॥

III. **अमीषु वाक्यद्वयस्य सप्रसङ्गं भावं स्फुटयत।** **2 x 4= 8**

१. वीरजा वीरजाया वीरजननी च मादृशी पराक्रमक्रयक्रीता कथम् अन्यथा कुर्यात् ?

२.सेनापतेर्वा अन्यस्य वा तदनुजीविनः कस्यचिदुदाररूपा नारी न गता भवेद्दर्शनगोचरम्।

३. फलकालेऽन्य एव विटाः समुपस्थाप्यन्ते।

III. **सावतरणं गद्यभागोऽयं व्याख्येयः** **4**

१. तात किमेवमतिमहारम्भपरिग्रहणेन गरिमाणमारोप्यते बलादतिलघीयानप्यहितः। हरिणार्थमतिह्रेपणः सिंहसम्भारः। तृणानामुपरि कतिकवचयन्त्याशुशुक्षणयः। अपि च तवाष्टादशद्वीपाष्टमङ्गलकमालिनी मेदिन्यस्त्येव विक्रमस्य विषयः॥

V. (१). कीदृशौ शिवमधुमथनौ सेतुबन्धकृता ग्रन्थादौ उपवर्णितौ ? विशदयत। **10**

(२).रघुनन्दनेन दृष्टं शरधिमपवर्णयत। **10**

–अनुवर्तते

**VI. संस्कृतच्छायालेखनपूर्वकं श्लोकद्वयं सावतरणं व्याख्यात ।** **2 x 6= 12**

१. कहवि ठवेन्ति पवङ्गा समुद्दं सणविसा अविमुहिज्जन्तम् ।
गलिअगमणाणुराअं पडिवन्थणियअत्तलोअणं अप्पाणं ॥

२. विवला अन्तभुअंगं उव्वत्तिअजलअरं विहिण्णमहिहरम् ।
मुहुमारुअविहुअलं पेच्छअ रअणाअरं करेमि थलवहम् ॥

३. चिन्तिअलद्धत्थं विअ भुमआविकखेवसूइ आमरिसरसम् ।
गमणं राहवहिअए रक्खसजीविअहरं विसं व णिहित्थम् ॥

**VII. एतेषु पद्यार्धद्वयस्य भावं सप्रसङ्गं स्फुटयत ।** **2 x 4= 8**

१. अदिदटठे व्वण मुक्कं दिटठेउअहिम्मिलक्खणेण विधीरम् ।

२. कित्ति व्व पवणतणअं आणव्व वलाईं से विलग्गइ टिटठी ।

३. मा  दा देउ रहुवई बाणाहिमुहिं च बाहगरुइं दिट्ठिम् ॥

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : US-05**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.II — विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्— सामान्यभागः

### भागः - २, पत्रिका - ५

### विषयः - संशोधनपद्धतेः मूलांशाः शोधप्रबन्धश्च ।

**दिनाङ्कः** - Date : 22-03-2014 ] **[ गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**'अ-विभागः'**

**उत्तराणि लिखत (चतुर्णाम्)** **4x5= 20**

I. अनुसन्धानं नाम किम् ? विवेचयत।

II. आख्यानपुनराख्यानयोः विवरणं कुरुत ।

III. अनुसन्धानेषु'मौलिकतायाः'स्थानं स्पष्टयत ।

IV. प्राचीनलिपिविज्ञानस्य इतिवृत्तं निरूपयत ।

V. प्राचीनकालेषु उपयुक्ताः लेखनसामग्रीः परीक्षत ।

VI. 'वर्तमानकाले विमर्शात्मकग्रन्थसम्पादनम् आवश्यकम्' इतीमं विषयं सम्यक् विवेचयत ।

VII. तथ्यान्वेषणप्रकारान् निरूपयत ।

**'ब-विभागः'**

**अधोनिर्दिष्टान् विषयान् अनुसृत्य शोधात्मकं प्रबन्धमारचयत ।**

VIII. 'भारतीयदर्शनानि तेषां विभाग व्यवस्था च' इतीमं विषयमधिकृत्य सविस्तरं प्रबन्धमारचयत । **अथवा**

'व्याकरणशास्त्रम्' इति विषयमधिकृत्य सविमर्शं प्रबन्धं लिखत । **अथवा**

'वेदान्तदर्शनम्' इति विषयमधिकृत्य सविमर्शं प्रबन्धमारचयत । **10**

IX. 'वेदाःभारतीयसंस्कृतिश्च' इतीमं विषयमाश्रित्य सविस्तरं सविमर्शं च प्रबन्धमारचयत । **अथवा**

'न्यायशास्त्रं सर्वशास्त्रोकारकम्' विषयमिमं शोधबुद्ध्या विवेचयत अथवा

'भारतीय ज्योतिर्विज्ञानम्' विषयमिमं संशोधनबुद्ध्या पर्यालोचयत । **10**

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : US-06**

# स्नातकोत्तरपरीक्षा:—२०१४

## एम्.ए.II — विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्— व्याकरणशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - महाभाष्यम्—१

**दिनाङ्कः** - Date : -18-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**सूचना - अन्तिममनपहाय षट् प्रश्नाः समाधेयाः ।**

I. 'स्थानेयोगा' इत्यस्य निर्वचनमुपपाद्य सूत्रप्रयोजनं वर्णयत । **12**

II. मिदागमपरिभाषायां मितः पूर्वान्तत्वं प्रसाध्य सूत्रार्थं वर्णयत । **12**

III. 'स्थनेऽन्तरतमः' अस्योदाहणं प्रदर्शयित्वा 'स्थाने'ग्रहणफलं प्रतिपादयत । **12**

IV. तातङः सर्वादेशतां सयुक्तिकं निरूपयत । **12**

V. स्थानिवत्सूत्रमारम्भणीयम् ? उत न ? भाष्यदिशा प्रतिपादयत । **12**

VI. 'अप्रत्ययः' इत्यनेन भाव्यमानपरिभाषाज्ञापकतां प्रसाधयत । **12**

VII. ससन्दर्भं चत्वारि व्याख्यात । **4x5=20**

१. सिद्धमेङः सङ्ख्यानत्वात् ।

२. सम्बन्धिशब्दैर्वा तुल्यम् ।

३. सित् तद्विशेषाणां वृक्षाद्यर्थम् ।

४. भेर्याघातवत् ।

५. निर्दिष्टग्रहणमानन्तर्यार्थम् ।

—०—

Total No. of Questions : 7 ] [ Total No. of Printed Pages : 1

**Code No. : US-07**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्धदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– व्याकरणशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - महाभाष्यम्–२

**दिनाङ्कः** - Date : 19-3-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 80

---

**सूचना - अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

I. 'शेषात् कर्तरि परस्मैपदम्' सूत्रे 'शेषात्' इति यथान्यासे दोषानुद्भाव्य परिहरत। 12

II. 'अनुपराभ्यां कृञः' सूत्रप्रयोजनमुपवर्ण्य 'आत्मनेपदनियमे वा प्रतिषेधः' इत्यस्याशयं विशदयत। 12

III. 'सिद्धं त्वतस्मिन् णाविति वचनात्' इत्यस्याशयं यथाभाष्यं व्याकुरुत। 12

IV. सकैयटम् 'अभिप्र'ग्रहणस्य प्रयोजनमुपन्यस्य 'स्वरितञितः...' सूत्रं यथाभाष्यं विवृणुत। 12

V. 'णेरणौ यत्कर्म णौ चेत्....' इति सूत्रं यथाग्रन्थं विचारयत। 12

VI. सिद्धं तु पूर्वस्य लिङ्गातिदेशात्' इत्यस्य वार्तिकस्य कोऽभिप्रायः ? ससन्दर्भं विलिखत। 12

VII. **चतुर्णामेव टिप्पणीं लिखत।** 4x5=20

१. उपाद्देवपूजासङ्गतकरणयोः।

२. सिद्धं लङादीनामात्मनेपदवचनात्।

३. न वा प्रयोगाभावात्।

४. आगमेः क्षमायाम्।

५. वा लिप्सायाम्।

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : US-08**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्— व्याकरणशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - वैय्याकरणभूषणसारः(परमलघुमञ्जूषा च)

**दिनाङ्कः** - Date : 20-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**सूचना - अन्तिममनपहाय षट् प्रश्नाः समाधेयाः।**

I. 'द्वितीयोत्पत्तौ सञ्ज्ञाया एव नियामकत्वात्' वाक्यमिदं ससन्दर्भं व्याख्यात। **12**

II. सप्तविधं कर्म सोदाहरणं निरूपयत। **12**

III. अपादानकारकं यथावैय्याकरणभूषणसारं प्रतिपादयत। **12**

IV. उपसर्गनिपातयोर्द्योतकत्वम् उत वाचकत्वम् ? तार्किकमतनूद्य खण्डयत। **12**

V. वृत्तेस्त्रैविध्यं निरूप्य इच्छायाः सम्बन्धत्वं निराकुरुत। **12**

VI. 'नञर्थः प्रलयं गतः' वाक्यस्यैतस्याशयं विलिख्य नागेशमतं स्पष्टीकुरुत। **12**

VII. 'फलं धात्वर्थः, व्यापरः प्रत्ययार्थः' इत्यङ्गीकारे दोषान् प्रदर्श्य शाब्दिकसम्मतं धात्वर्थं विशदीकुरुत। **12**

VIII. चतुर्णामेव टिप्पणीं लिखत। **5x4=20**

१. अप्रसिद्धा शक्तिः।

२. योग्यता।

३. करणं तत्तदा स्मृतम्।

४. अष्टौ स्फोटाः।

५. शास्त्रेऽधिकरणं स्मृतम्।

६. अनादिनिधनम् ब्रह्म।

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : US-09**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्धदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– व्याकरणशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - वाक्यपदीयम्

**दिनाङ्कः** - Date : 21-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**सूचना - अन्तिममनपहाय सप्त प्रश्नाः समाधेयाः ।**

**I.** द्रव्यस्य साधनत्वनिराकरणपूर्वकं 'गुणसमुदायः साधनम्' इति समर्थयत । **12**

**II.** साधनशक्तिः विभक्त्यादिभिः प्रतीयते, न तु कर्मादिशब्दैरिति पूर्वपक्षमुद्भाव्य सिद्धान्तं प्रकटयत । **12**

**III.** **कारिकामिमां ससन्दर्भं व्याख्यात ।** **12**

बुद्ध्या समाहितैकत्वात् पञ्चालान् कुरुभिर्यदा ।
पुनर्विभजते वक्ता तदापायः प्रतीयते ॥

**IV.** क्रियानिष्पत्तौ सर्वस्यापि कारकस्य कर्तृत्वे सति करणादित्वसम्भवः कथमिति दृष्टान्तपूर्वकं प्रतिपादयत । **12**

**V.** तृतीयावाच्य-चतुर्थीवाच्यतादर्थ्ययोः भेदं सोदाहरणं प्रतिपादयत । **12**

**VI.** द्रव्यशक्तिः किं सहजा उत उद्भाव्येति निरूप्य, तत्रागमप्रमाणं प्रदर्शयत । **12**

**VII.** 'सामान्यभूता क्रिया वर्तते' इति भाष्योक्तिं ग्रन्थकृदुक्तदिशा समर्थयत । **12**

**VIII.** **विवृणुत** **8**

१. शक्तेः स्वाश्रयात् व्यतिरिक्तत्वम् ।

२. ईप्सितानीप्सितकर्मभेदः ।

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : US-10**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– नवीनन्यायशास्त्रम्

### भागः - १, पत्रिका -१

### विषयः - सव्यभिचारः

**दिनाङ्कः** - Date : 18-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**I.** सव्यभिचारसिद्धान्तप्रणयनस्य असाङ्गत्यं परिहरत । **10**

**II.** प्राचीनाः साधारणादिज्ञानस्य केन रूपेण संशयजनकत्वं वदन्ति ? **10**

**III.** 'साध्यसन्देहेति प्रकृतम्' मणिमिमं व्याख्यात । **10**

**IV.** कोटिद्वयोपस्थितिः स्मृत्यनुभवसाधारणी सन्देहजननी चेत् नियामकं किमिति विवृणुत । **10**

**V.** 'बाधप्रतिरोधौ तु धर्मिविशेषितत्वात् न तादृशौ' इतीमां दीधितिं यथागादाधरि व्याख्यात । **10**

**VI.** तन्न मनोज्ञं विज्ञानामित्यनेननिराकृतं मतं निरूपयत । **10**

**VII.** सर्वमाकाशाभाववदित्यत्र आकाशाभावे को बाधः ?उपपादयत । **10**

**VIII.** **द्वयोरेव लघुटिप्पणीरारचयत ।** **2x5= 10**

१. असाधारणस्य दूषकताबीजम् ।

२. प्रत्येकमेव हेत्वाभासत्वम् ।

३. धारावाही सन्देहः ।

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : US-12**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्— नवीनन्यायशास्त्रम्

### भागः - १, पत्रिका -२

### विषयः - शक्तिवादः

**दिनाङ्कः** - Date : 19-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**I. त्रयः प्रश्नाः समाधेयाः** **12x3= 36**

१. 'आकाशशब्दस्य शब्दाश्रयत्वोपलक्षिते शक्तिः' इति प्राचीनमतं विमृशत।

२. प्रभाकरमते धेनुपदस्य कुत्र शक्तिरिति विमृशत।

३. तत्पदस्य नानार्थकत्वं कथं परिहरणीयम्।

४. सिद्धान्तरीत्या सर्वपदप्रवृत्तिमित्तं किम् ?

५. जातिशक्तिवादमतं भाट्ट-प्राभाकररीत्या निरूपयत।

**II. ससन्दर्भं चत्वारि विवृणुत।** **5x4= 20**

१.'अस्तु पदादपि निर्विकल्पकम्' ।

२. 'सकृदुच्चरितात् सकृदर्थप्रत्यय एव' ।

३. 'स्वसम्बोध्ये युष्मदः, स्वोच्चारयितरि चास्मदः शक्तिः' ।

४. 'नापि (अशेषत्वं) तत्तदुद्देश्यतावच्छेदकव्यापकतत्तद्विधेयवत्वम्' ।

५. 'उद्देश्य-विधेयभावश्च न विशेष्यविशेषणभावनियतः' ।

६. 'कुत्सितमपि क्वचित् किम्पदार्थः' ।

**III. अष्टप्रश्नानां सङ्क्षेपेण उत्तरं लिखत।** **8x3= 24**

१. पुष्पवन्तपदस्य कुत्र शक्तिः ?

२. 'घटपटौ न स्तः' अत्र किं प्रतियोगितावच्छेदकम् ?

३. विशेषणोपलक्षणयोः कः भेदः।

–अनुवर्तते

४. स्वतन्त्रोच्चारणं नाम किम् ?

५. 'मया त्वयि हतेऽत्रैव' इत्यत्रास्मच्छब्दार्थः कः ?

६. राम-रावणादिपदेभ्यो स्मरण-शाब्दबोधौ कथम् ?

७. 'अयमहं पण्डित इति जानाति' अत्र कस्य जानातिकर्मत्वम् ।

८. 'पिष्टकमय्यो गावः' अत्र गोपदार्थः कः ?

९. अनेकत्वं किंरूपम् ?

१०. अदसः कुत्र शक्तिः ?

—०—

Total No. of Questions : 3 ] [ Total No. of Printed Pages : 1

**Code No. : US-12**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– नवीनन्यायशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - व्युत्पत्तिवादः

**दिनाङ्कः** - Date : 20-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**I. त्रयाणां उत्तरं लिखत ।** **13x3= 36**

१. प्राचीनमते द्वितीयाविभक्तिं निरूप्यानुपपत्तिं परिहरत ।

२. प्राचीननवीनमतयोः किं मतं साधु इति गदाधररीत्या विमृशत ।

३. 'गां दोग्धि पयः' अत्र शाब्दबोधप्रकारः कथम् ?

४. प्राचीननवीनमतरीत्या 'कर्मणि द्वितीया' इति सूत्रार्थः कः ?

५. गुरुं धर्मं पृच्छति' अत्र शाब्दबोधप्रकारं विमृशत ।

**II. अष्टप्रश्नानां उत्तरं लिखत** **8x5= 40**

१.'दण्डं विना न घटः' अत्र शाब्दबोधः कथम् ?

२. 'पण्डितं पुत्रीयति' अत्र बोधः कीदृशः ?

३. 'गवां मध्ये कृष्णा बहुक्षीरा' अत्र निर्धारणं कीदृशम् ?

४. 'पर्वते वह्निं अनुमिनोति' अत्र शाब्दबोधः कथम् ?

५. 'ओदनं भुङ्क्ते' अत्र शाब्दबोधः कथम् ?

६. कर्तुः कर्मत्वं कथं वारणीयम् ?

७. कर्म कतिविधम् ?

८. द्वितीयासप्तम्यर्थयोः कुत्रान्वयः ?

९. सविषयार्थकधातुस्थले द्वितीयार्थः कः ?

१०.'अजो ग्रामं पापयति' अत्र द्विकर्मकत्वं कथम् ?

**III. द्वयोः टिप्पणीं लिखत** **2x3= 4**

१.कर्मणि द्वितीया २.आख्यातार्थः ३. निष्पाद्यं कर्म

—०—

Total No. of Questions : 8 ]  [ Total No. of Printed Pages : 1

**Code No. : US-13**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– नवीनन्यायशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - प्रामाण्यवादः इत्यादि

**दिनाङ्कः** - Date :21-03-2011 ]  [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M.]  [ Max. Marks : 80

---

**I. दशानां सङ्क्षेपेण उत्तरं लिखत** **10x3= 30**

१. रघुनाथशिरोमणिः कः ?

२. तत्वचिन्तामणिः केन रचितः ?

३. मङ्गलपद्यं लिखत।

४. प्रामाण्यं नाम किम् ?

५. 'रघुनाथनामा' अत्र कः समासः?

६. प्रामाण्यनिश्चयफलं किम् ?

७. ज्ञानग्राहकसामग्री का ?

८. प्रामाण्यं परतः इति निश्चयः कथम् ?

९. ग्राह्यसंशयः कुतो न प्रतिबन्धकः ?

१०. प्रवृत्तिसामान्यस्य प्रामाण्यनिश्चयः आवश्यको वा?

११. बाधस्वरूपं किम् ?

II. गुरुमते साध्याप्रसिद्धिं निरूप्य विमृशत **10**

III. 'गिरं गुरूणां' इत्याद्यपद्यं यथाग्रन्थं निरूयत। **10**

IV. मिश्रमतोक्तरीत्या ज्ञानपदव्यावृत्तिं अनूद्य दूषयत। **10**

V. बाधविभाजकलक्षणं सदलकृत्यं लिखत। **10**

**VI. टिप्पणीं लिखत** **10**

१.'न च यस्य संशयव्यतिरेकनिश्चयौ।

२. स्वतो ग्राह्यत्वसाधकानुमानम्।

—०—

Total No. of Questions : 10 ] [ Total No. of Printed Pages : 1

**Code No. : US-18**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्— धर्मशास्त्रम्

## भागः - १, पत्रिका - १

## विषयः - निर्णयसिन्धुः-२

**दिनाङ्कः** - Date : 18-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 80

---

**सूचना - यथारुचि अशीत्यङ्कानामुत्तरं लिखत।**

| | | |
|---|---|---|
| **I.** | श्राद्धभेतान् सलणान् लिखत। | **10** |
| **II.** | श्राद्धकालान् विशदयत। | **10** |
| **III.** | श्राद्धकर्तृभोक्तृनियमान् विवृणुत। | **10** |
| **IV.** | श्राद्धे देयवस्तुनिर्णयं सम्पादयत। | **10** |
| **V.** | ब्श्राद्धविघ्ने किं कार्यम् ? विवृणुत। | **10** |
| **VI.** | प्रयागमरणनिर्णयं सम्पादयत। | **10** |
| **VII.** | पार्वणानुकल्पम् आमश्राद्धं विवृणुत। | **10** |
| **VIII.** | श्राद्धाङ्गतर्पणनिर्णयं स्पष्टयत। | **10** |
| **IX.** | यतिसंस्कारनिर्णयमुपपादयत। | **10** |
| **X.** | प्रथमाब्धे निषिद्धानि कानि ? विवृणुत। | **10** |

—०—

Total No. of Questions : 8 ] [ Total No. of Printed Pages : 1

**Code No. : US-19**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.॥ – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

## भागः - १, पत्रिका - २

## विषयः - मनुस्मृतिः-२

**दिनाङ्कः** - Date : 19-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**I. ससन्दर्भं व्याख्यात (पञ्चैव)** **5x6=30**

१. बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति ॥

२. सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम्।
अब्रुवन् विब्रुवन् वापि नरो भवति किल्बिषी ॥

३. पिता रक्षति कौमारे भर्ता रक्षति यौवने।
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥

४. क्षत्रियाद् विप्रकन्यायां सूतो भवति जातितः।
वैश्यान्माघदवैदेहौ राजविप्राङ्गनासुतौ ॥

५. यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥

६. परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥

**II. पञ्चानामुत्तराणि लिखत।** **5x10=50**

१. 'राजधर्मान् प्रवक्ष्यामि'-इत्यादिना निरूपितान् राजधर्मान् सङ्क्षेपेण विवृणुत।

२. व्यवहारस्वरूपं मनूक्तदिशा विवृणुत।

३.स्त्रीपुन्धर्मान् सङ्क्षेपेण यथाग्रन्थमनुवदत।

४. सकृदंशो निपतति सकृत्कन्या प्रदीयते– सप्रसङ्गं व्याख्यात।

५. ब्राह्मणादीनां जीवनोपायमार्गं मनूक्तदिशा विमृश्य विवृणुत

६. नवमाध्यायस्य सारांशं सङ्गृह्य लिखत

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 1

**Code No. : US-20**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - कालमाधवीयम्-२

**दिनाङ्कः** - Date : 20-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M.. ] [ Max. Marks : 80

---

**सूचना - यथारुचि चत्वारः प्रश्नाः समाधेयाः**

| | | |
|---|---|---|
| I. | जन्माष्टमी-जयन्तीव्रतयोः स्वरूपनिरूपणं कुरुत। | **20** |
| II. | एकादशी-निर्णयं ग्रन्थोक्तदिशा निरूपयत। | **20** |
| III. | शिवरात्रिव्रतनिर्णयं ग्रन्थोक्तदिशा विवृणुत। | **20** |
| IV. | पञ्चदशीनिर्णयं लिखत। | **20** |
| V. | सङ्क्रान्तिनिर्णयं लिखत। | **20** |

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 1

**Code No. : US-21**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– धर्मशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - दत्तकमीमांसा

**दिनाङ्कः** - Date : 21-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**सूचना - यथारुचि चत्वारः प्रश्नाः समाधेयाः**

I. दत्तकमीमांसाग्रन्थकृता कृतमङ्गलाचरणं विलिख्य अनुबन्धचतुष्टयं निरूप्य तथा पुत्रप्रतिनिधिः केन कार्यः ? इत्यादिकं निरूप्य अपुत्रशब्दार्थं च विवृणुत ॥ **20**

II. पौनर्भवस्यौरसत्वमाशङ्क्य तन्निरासः तथा प्रतिनिधित्वस्य युक्तिसिद्धत्वे 'पुत्रप्रतिनिधीनाहुः' इति वचनवैयर्थ्य-शङ्कायामुत्तरं च लिखत । **20**

III. दत्तकस्त्रिविधः, त्रिविधेष्वपि दत्तकेषु प्रतिगृहीतृगोत्रसम्बन्धोपपादनं, विवाहोत्तरमपि गृहीतस्य दत्तकस्यानित्यह्यामुष्याणोऽन्तर्भावादि विचारान् स्पष्टयत । **20**

IV. क्षत्रियादिरपि ब्राह्मणस्य पुत्रो भवति शूद्रोऽपि किल पुत्रो भवतीत्येवं मेधातिथिकल्पतर्वोव्याख्यानस्य अयुक्तत्वं, मेधातिथिराशयः तन्निरासं च लिखत । **20**

V. कीदृशेन पुत्रो देयः केन न देयमिति विचारम्, पुत्रदाननिषेधकवचनानां व्यवस्था, पुत्रद्वयवताऽपि पुत्रो न देयः, स्त्रिया स्वातन्त्र्येण पुत्रदानेऽनधिकारः इत्यादिकमधिकृत्य विवृणुत । **20**

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : US-22**

# स्नातकोत्तरपरीक्षाः—२०१४

## एम्.ए.II — विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्— ज्योतिषशास्त्रम्

### भागः - १, पत्रिका - १

### विषयः - सिद्धान्तशिरोमणिः - १ (गणिताध्यायः)

**दिनाङ्कः** - Date :18-03-2014 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- Time : 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 80

---

**I. चतुर्णां विस्तरेण उत्तरं लिखत** **10x4= 40**

१. अक्षक्षेत्राणि कानि ? सालेख्यं सप्रयोजनं निरूपयत ।

२. प्रकारत्रयेण दिक्साधनमुपवर्ण्य 'अयनदिश्यैन्दी स्फुटा चालिता' इत्यस्याशयं स्पष्टयत ।

३. यत्र पञ्चाङ्गुला पलभा तत्र दशनाडिकासु नवमिता इष्ट भा दृष्टा । तत्र रविसाधनक्रममुपणर्वयत ।

४. 'मनूनकाः स्याद् ग्रहणस्य सम्भवः' इतीममंशं सम्यगुपपादयत ।

५. चन्द्रग्रहणे स्थित्यर्धमर्दार्धसाधनं सोपपत्ति व्याख्याय तयोः स्फुटीकरणविधानं ब्रूत ।

६. विभास्वभासाधनपूर्वकं चन्द्रशृङ्गोन्नतिगणितं सम्यङ् निरूपयत ।

**II. चतुर्णां सङ्क्षेपेण उत्तरं लिखत** **5x4= 20**

१. लग्नसाधनं सोपपत्ति निरूपयत ।

२. हृतिं अन्त्यां च आनीय दिनार्धशङ्कुं साधयत ।

३. 'अथोन्नतादूनयुताच्चरेण' इत्यादिक्रमेण उन्नतकालात् छायां साधयत ।

४. रविचन्द्रयोः बिम्बकलानयनं सोपपत्ति निरूपयत ।

५. आयनाक्षजवलनानयने कुरुत ।

६. कोणशङ्कोः साधनं कुरुत ।

**III. द्वयोः टिप्पणीमारचयत ।** **5x2= 10**

१. लम्बनम् २. नतिः ३. दृक्कर्म ४. पातः

–अनुवर्तते

**IV. रिक्तस्थानानि पूरयत** 5x1= 5

१.....................................नरो ना कथितः ।

२. भुजोऽक्षभा कोटिरिनाङ्गुलो ना कर्णः......खलु मूलमेतत् ।

३. नवतेर्विशोधितं नतं ...........................भवेत् ।

४. सदाक्षलम्बविह.............................भवतः ।

५. .........................त्वधोमुखनरस्य तलं प्रदिष्टम् ।

**V. यथायथं योजयत** 5x1= 5

| | | |
|---|---|---|
| १. हृतिः | – | चरज्या |
| २. कुज्या | – | सूत्रम् |
| ३. द्युज्या | – | दृग्ज्या |
| ४. कला | – | अन्त्या |
| ५.छाया | – | त्रिज्या |

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : US-23**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– ज्योतिषशास्त्रम्

### भागः - १, पत्रिका - २

### विषयः - गोलाध्यायः-२

**दिनाङ्कः** - Date : 19-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**I. पञ्चानां विस्तरेण उत्तरं लिखत** **10x5= 50**

१. गोले चरस्य स्थानं निर्दिश्य दिननिशोर्लाघवमहत्त्वे कारणं स्पष्टयत।

२. देवानां समार्धं दिनं कथं सम्भवतीति प्रतिपाद्य 'दिनोन्मुखेऽर्के दिनमेव तन्मतम्' इत्यस्याशयं स्पष्टयत।

३. देशभेदेन राश्युदयप्रमाणभेदे कारणं सम्यग्विवेचयत।

४. सूर्यचन्द्रयोर्ग्रहणे राहुः न च्छादकः इति किमर्थं ब्रुवन्ति ? सर्वागमानां अविरुद्धं मतं ब्रूत।

५. उत्क्रमज्यया वलनं कुतो न कार्यमिति गोले क्षेत्रनिदर्शनपूर्वकं स्पष्टयत।

६. 'नैव बाणः कुजेऽसौ कदम्बोन्मुखः' इत्यस्य कोऽर्थः ? नामनोन्नामनद्वारा दृक्कर्मस्वरूपं स्पष्टयत।

७. चन्द्रशृङ्गोन्नतौ को हेतुः ? शृङ्गोन्नतिसाधकत्रिभुजं सालेख्यं विशदयत।

८. यन्त्राणि कति सन्ति ? गोलयन्त्रस्य विन्यासं तस्मात् कालज्ञानप्रकारं च ब्रूत।

**II. पङ्क्ति द्वयं सावतरणं व्याख्यात** **5x2= 10**

१.षट्षष्टिभागाभ्यधिकाः पलांशाः यत्राथ तत्रास्त्यपरो विशेषः।

२. घट इव निजमूर्तिच्छाययैवातपस्थः।

३. दलीकृतं चक्रमुशन्ति चापं कोदण्डखण्डं खलु तुर्यगोलम्।

**III. द्वयोः टिप्पणीमारचयत।** **5x2= 10**

१. लम्बनम् २. नतिः ३. घटीयन्त्रम् ४. ऋतुवर्णनम्

**IV. रिक्तस्थानानि पूरयत** **5x1= 5**

१.उन्मण्डलक्ष्मावलयान्तराले द्युरात्रवृत्ते.............।

२. पितरः स्वाधः......................आगमन्ति।

–अनुवर्तते

३.भजक्रपादाः निरक्षदेशे............नाडिकाभिः समुद्यन्ति ।

४. मध्यलग्नमिति.......................................।

५. क्ष्माजे द्युरात्रसममण्डलमध्यभागजीवा.........भवति ।

**V. यथायथं योजयत** **5x1= 5**

| | | |
|---|---|---|
| १. यत्पूर्वापरभावेन | – | शिञ्जिनी तु क्रमज्यका। |
| २. यद्याम्योत्तरभावेन | – | द्युरात्रके तद्धृतिरत्र कर्णः। |
| ३. उत्क्रमज्या यतो बाणः | – | नतिसञ्ज्ञः तदुच्यते । |
| ४.छायातोऽग्रतो वा भानुः | – | लम्बनाख्यं तदन्तरम् । |
| ५.अग्रा भुजःस्वे समना च कोटिः | – | स क्रान्तिपात एव स्यात् । |

——○——

Total No. of Questions :10 ] [ Total No. of Printed Pages : 1

**Code No. :US-24**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– ज्योतिषशास्त्रम्

### भागः - १, पत्रिका - ३

### विषयः - बृहत्संहिता

**दिनाङ्कः** - Date : 20-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M. ] [ Max. Marks : 80

---

**सूचना - अन्तिममनपहाय षट् प्रश्नाः समाधेयाः ।**

I. दैवज्ञस्य लक्षणं गुणांश्च विलिख्य' नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता' इत्यस्य वाक्यस्याशयं विशदयत । 12

II. सलक्षणं सफलं चन्द्रस्य दशसंस्थानानि विशधयत । 12

III. तामसकीलकानां स्वरूपं दर्शनाकृतिवशात् फलविशेषं च निरूपयत । 12

IV. सलक्षणं सफलं बुधस्य सप्तगतीः निरूप्य पराशरमतेन आसां उदयास्तलक्षणं च विलिखत । 12

V. गुरुवर्षानयनरीतिं निरूप्य १९२३तमे वर्षे कः संवत्सरः भवतीति गणितमुखेन प्रदर्शयत । 12

VI. चन्द्रसूर्ययोः ग्रहणे दशग्रासमोक्षयोः स्वरूपं विशदयत । 12

VII. केतुचारविषये मन्तान्तराणि विलिख्य आचार्यसिद्धान्तं सफलं सङ्गृह्णीत । 12

VIII. सप्रयोजनं मतान्तरप्रदर्शनपूर्वकं शुक्रस्य वीथीमार्गादीनां लक्षणानि विलिखत 12

IX. ग्रहयुद्धस्य कारणं स्वरूपं च विलिख्य सफलां तेषां आक्रन्दादिसञ्ज्ञां निरूपयत । 12

X. **चतुर्णां टिप्पणीराराचयत ।** **5 x4= 20**

| | |
|---|---|
| १. अयनपरीक्षाःक्रमः | २. प्रतिसूर्यलक्षणम् |
| ३. रुधिराननम् | ४. द्वादशयुगानि |
| ५. श्वेतकेतुः | ६. ग्रहसंवर्तः |

——०——

Total No. of Questions : 5 +6= 11 ] [ Total No. of Printed Pages : 1

**Code No. : US-25**

# स्नातकोत्तरपरीक्षाः–२०१४

## एम्.ए.II – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– ज्योतिषशास्त्रम्

### भागः - १, पत्रिका - ४

### विषयः - प्रश्नमार्गः मुहूर्तचिन्तामणिश्च

**दिनाङ्कः** - Date : 21-03-2014 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- Time : 2.00 P.M. to 5.00 P.M.] [ Max. Marks : 80

---

### भागः - १ - प्रश्नमार्गः

**I. अधोनिर्दिष्टेषु त्रयाणामुत्तरं लिखत** **10x3= 30**

१. उन्माददायिनः अष्टौ योगाः के ? उन्मादरोगलक्षणं तत्परिहारं च ब्रूत ।

२. भावाधीशे च भावे......................।
...................द्वित्रिसवंवादभावात् ॥ श्लोकमेनं पूरयित्वा सावतरणं व्याख्यात ।

३. दैवानुकूल्यं प्रातिकूल्यं वा कथं विचारयेत् ? ग्रहैः देवताचिन्तनं देवलोपचिन्तनं च विवृणुत ।

४. प्रश्ने सर्पबाधाचिन्तनं कथं कुर्यात् ? निरूपयत ।

५. बाधास्थानं कथं निर्णीयते ? प्रश्ने शत्रुबाधाचिन्तनम् उपवर्णयत ।

**II. द्वयोः टिप्पणीमारचयत** **5x2= 10**

१. षड्विधायुर्योगाः । २. मृत्युञ्जयहोमः । ३. विषभोजनम् । ४. इष्टानिष्टगतस्य कुजस्य फलानि ।

### भागः - २ - मुहूर्तचिन्तामणिः

**III. अधोनिर्दिष्टेषु त्रयाणामुत्तरं लिखत** **10x3= 30**

१. अष्टकूटानि कानि ? तेषु ग्रहमैत्र-गण-राशि-नाडीकूटानां स्वरूपं महत्त्वं च विवृणुत ।

२. विवाहे विहितानि नक्षत्राणि कानि ? विवाहमुहूर्तं सम्यग् विवेचयत ।

